01-11-2020

साहित्यम्। शास्त्री

प्रश्नः→ निम्नांकिते पद्ये छन्दालङ्कारनिर्णयं कुरुत ।

" शिखा प्रदीपस्य सुवर्णपिञ्जरा
महीतले सन्धिमुखेन निर्गता ।
विभाति पर्यन्ततमः समावृता
सुवर्णरेखेव कषे निवेशिता ॥"

उत्तरम्→
यगणादिनिर्णयः→
शिखा प्रदीपस्य सुवर्णपिञ्जरा,
। ऽ । ऽ ऽ । । ऽ । ऽ । ऽ
जगण तगण जगण रगण

पद्यस्य प्रत्येके चरणे द्वादशाक्षराः सन्ति। जगणादिनिर्णयं कृत्वा ज्ञायते मया यदत्र जगती छन्दस्य भेदः वंशस्थछन्दः अस्ति । तल्लक्षणमस्ति→
" जतौ तु वंशस्थमुदीरितं जरौ ।"

अलङ्कारः→ उपमा ।
" साधर्म्यमुपमाभेदे ।"
उपमानम्→ कषे निवेशिता सुवर्णरेखा ।
उपमेयः→ प्रदीपस्य शिखा ।
उपमावाची शब्दः→ इव ।
साधर्म्य → विभाति । अतएवात्र पूर्णोपमालङ्कारः

01-11-2020

डॉ० निर्मल कुमार झा (स० प्राचार्यः)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ

01-11-2020

संस्कृतसामान्यम् । उपशास्त्री II

अनिवार्यप्रथमपत्रम् ।

## बहुव्रीहि समासे रूपसिद्धिः ।

### पीताम्बरः

लौकिकविग्रहः → पीतानि अम्बराणि यस्य सः ।
अलौकिकविग्रहः → पीत जस् अम्बर जस् ।
अत्र षष्ठीविभक्त्यर्थे प्रथमान्तपदयोः
पीतस्य अम्बरस्य च बहुव्रीहिः समासः 'अनेकमन्यपदार्थे'
सूत्रेण । पीत जस् अम्बर जस् ।
कृत्तद्धित समासाश्च सूत्रेण प्रातिपदिक संज्ञा ।
सुपोधातु प्रातिपदिकयोः सूत्रेण सुप् लोपः →
पीत अम्बर । अकः सवर्णे दीर्घः सूत्रेण दीर्घः →
पीताम्बर । एकदेशविकृतमनन्यवत् न्यायेन पुनः
प्रातिपदिक संज्ञा । स्वौजसमौट्० सूत्रेण सु →
पीताम्बर सु । ससजुषो रुः →
पीताम्बर र् । खरवसानयोः विसर्जनीयस्य
सूत्रेण रुत्व विसर्गः → **पीताम्बरः** ।

01-11-2020

डॉ० निर्मल कुमार झा (स० प्राचार्यः)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ

01-11-2020

संस्कृतसामान्यम् । उपशास्त्री I

अनिवार्यप्रथमपत्रम् ।

Page No.:
Date: / /

## संस्कृतानुवादः ।

मैंने पत्रों को लिखा → अहं पत्राणि अलिखम् ।
अहं पत्राणि लिखितवान् ।
अहं पत्राणि लिखितानि ।
मया पत्राणि लिखितानि ।

सीता घर गई → सीता गृहमगच्छत् ।
सीता गृहं गता ।
सीता गृहं गतवती ।
सीतया गृहं गतम् ।

उसने वाण से साँप मारा → सः वाणेन सर्पमहन् ।
सः वाणेन सर्पं हतः ।
सः वाणेन सर्पं हतवान् ।
तेन वाणेन सर्पः हतः ।

वेलोग फल खाते हैं → ते फलानि खादन्ति ।
तैः फलानि खाद्यन्ते ।

तुम कलम से लिखते हो → त्वं कलमेन लिखसि ।
त्वया कलमेन लिख्यते ।

तुमदोनों घर जाओगे → युवां गृहं गमिष्यथः ।
युवाभ्यां गृहं गन्तव्यम् ।
युवाभ्यां गृहं गमनीयम् ।

डॉ० निर्मल कुमार झा ( स० प्राचार्यः )
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।